**This Question Paper consists 42 questions and 8 printed pages.**
**अस्मिन् प्रश्नपत्रे 42 प्रश्नाः एवम् 8 मुद्रित पृष्ठाः सन्ति ।**

| **Roll No.** अनुक्रमाङ्कः अङ्केषु | | | | | | | | | | | | | **Code No. 53/S/O/S** कूट सं. **Set - A** |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|

# SANSKRIT
# संस्कृतम्
# (209)

**Day and Date of Examination**
(परीक्षादिवसः दिनाङ्कश्च) ____________________

**Signature of Invigilators** **1.** ____________________
(निरीक्षकहस्ताक्षरो)
**2.** ____________________

---

**सामान्य अनुदेशाः :**

**1** अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः ।

**2** निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति ।

**3** वस्तुनिष्ठप्रश्नेषु (A), (B), (C) वा (D) विकल्पेषु कोऽपि एकं उत्तरं चित्वा पृथकरूपेण प्रदत्ते उत्तर–पुस्तिकामध्ये लिखेत् ।

**4** वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि ।

**5** उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

**6** स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **53/S/O/S-A** अवश्यं लेखनीया ।

# SANSKRIT
# संस्कृतम्
# (209)

समयः 3 होरात्रयम्] [पूर्णाङ्काः : 100

निर्देशाः :

**(1)** अस्मिन् प्रश्नपत्रे **द्विचत्वारिंशत्** प्रश्नाः ।

**(2)** प्रत्येकं प्रश्नस्य समक्षम् अङ्काः सूचिताः ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

## खण्ड – क

**1** एतत् धर्मस्य लक्षणं नास्ति – **1×10=10**

(A) धृतिः (B) धीः

(C) मनः (D) शौचम्

**2** बोपदेवः किं ग्रन्थम् अरचयत् ?

(A) व्याकरणम् (B) बोधव्याकरणम्

(C) मुग्धबोधव्याकरणम् (D) बालबोधव्याकरणम्

**3** त्याज्यं न धैर्यमिति पाठे कुत्र प्राप्य मकरः रहस्यं वदति ?

(A) नदीतीरे (B) जलमध्ये

(C) मकरस्य गृहं (D) वृक्षं

**4** कण्वः शकुन्तलां प्रति किम् न उपदिशति ?

(A) सुगृहिणी भव (B) गुरून् शुश्रूषस्व

(C) परिजनेषु उदारा भव (D) समृद्धिषु अगर्विता भव

**5** कुक्कुटे एषः गुणः नास्ति –

(A) प्रातः उत्थानम् (B) बन्धुभिः सह भोजनम्

(C) आपद्गतां स्त्रियं त्यजेत् (D) युद्धम्

6 मित्रस्य चक्षुषा अहं सर्वाणि भूतानि समीक्षे इत्यत्र भूतानि इति पदे का विभक्तिः ?

(A) प्रथमा (B) द्वितीया

(C) सप्तमी (D) षष्ठी

7 समानी वः आकूतिः इत्यत्र वः इति पदे का विभक्तिः ?

(A) प्रथमा (B) षष्ठी

(C) द्वितीया (D) चतुर्थी

8 ब्राह्मे मुहूर्ते उत्तिष्ठेत् इत्यत्र रेखाङ्कितपदे कः लकारः ?

(A) लट् (B) विधिलिङ्

(C) लोट् (D) लङ्

9 'वृक्षः स्वयमातपे तिष्ठति' इति वाक्ये रेखांकितं पदं बहुवचने किं भविष्यति ?

(A) तिष्ठन्ति (B) तिष्ठतः

(C) तिष्ठतु (D) तिष्ठेत्

10 रिक्तस्थाने किं पदं भविष्यति ?

दन्तधावनं जिह्वादन्तास्यजं मलं ________ ।

(A) घ्नन्ति (B) हन्ति

(C) हन्तुः (D) हन्यात

11 'ते केचनान्ये भवन्ति ये उत्कोचलोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसि पातयन्ति' इति वाक्ये क्रियापदद्वयं किम् ? **1+1=2**

12 आनन्दयति कोऽत्यर्थं सज्जनानेव भूतले । **1+1=2**
प्रबोधयति पद्मानि तमांसि च निहन्ति कः॥ इति पद्ये कमलानि, अन्धकारान् च इति अर्थे किं पदद्वयं प्रयुक्तम् ?

13 ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः । **1+1=2**
ऋष्यमूकसमीपे तु वैदेहीं पुनरब्रवीत् ॥
इत्यत्र कः कां ब्रवीति ?

14 अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत – 1×3=3

सुमन्त्रः – अये ! किमिदानीं सैन्यघोषाः प्रशान्ताः ।
वत्स ! मन्ये कुमारेण जृम्भकास्त्रं प्रयुक्तमिति ।

चन्द्रकेतुः – अत्र कः सन्देहः ? पश्यतु सैन्यं चित्रलिखितमिव अस्पन्दम् आस्ते ।
अतोऽजितवीर्यं जृम्भकास्त्रमेवेदम् ।

सुमन्त्रः – कुतः पुनरस्य जृम्भकस्य प्राप्तिः ?

चन्द्रकेतुः – भगवतः प्राचेतसादिति मन्यामहे ।

**प्रश्नाः –**

(i) चन्द्रकेतोः सैन्यं कीदृशम् अभवत् ? कस्य च प्रयोगेण ?

(ii) लवः जृम्भकास्त्रं कुतः लब्धवान् ?

(iii) अजितवीर्यम् इति विशेषणस्य विशेष्यं किम् ?

15 अधोलिखितयोः कस्यचिदेकस्य चरित्रचित्रणं पञ्च वाक्येषु संस्कृतेन लिखत – 1×5=5

कण्वः **अथवा** शकुन्तला

16 जीवनं सर्वप्राणिनां जलाशयसुनिर्भरम् । 1+1=2

संरक्ष्यं वर्धनीयं च जलं रक्षति रक्षितम् ।

इत्यत्र (i) किमर्थं जलं रक्षणीयम् ?

(ii) केषां जीवनं जलाशयसुनिर्भरम् ?

17 आत्मवत्सर्वभूतानि पश्यतोऽस्य पदानुगाः । 1+1=2

गुणैः परवशीभूताः व्यवर्धन्त सहस्रशः ।

इत्यत्र (i) व्यवर्धन्त इति क्रियापदस्य कर्तृपदं किम् ?

(ii) महात्मा गांधिः कान् आत्मवत् पश्यति ?

18 अन्यदीये तृणे रत्ने काञ्चने मौक्तिकेऽपि च 1+1=2

मनसा विनिवृत्तिर्या तदस्तेयं विदुर्बुधाः ॥

इत्यत्र (i) केन अपि न चिन्तनम् अस्तेयम् उच्यते ?

(ii) 'लघुवस्तुनि' इत्यर्थम् किं पदमत्र प्रयुक्तम् ?

19 'केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः' इत्यत्र कः किं दृष्ट्वा प्रसीदति ? 1+1=2

20 'शरीरमाद्यं खलु धर्मसाधनम्' इति पाठः कस्मात् ग्रन्थात् संगृहीतः ? कश्च तस्य लेखकः ? अत्र कः विषयः वर्णितः ? 1×3=3

21 अधोलिखितपद्यांशस्य भावार्थे रिक्तस्थानपूर्तिं कुरुत – 1×3=3

**पद्यांशः –**

किमिच्छन्ति नराः काश्यां, भूपानां को रणे हितः ।
को वन्द्यः सर्वदेवानां, दीयतामेकमुत्तरम् ॥

**भावार्थः –**

जनाः काश्यां किम् इच्छन्ति ? (i) ________ । युद्धे (ii) ________ हितकरं किम् ? जयः । सर्वेषां देवानां वन्दनीयः कः ? (iii) ________

22 अधोलिखितवाक्येषु रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुर्वन्तु – 1×2=2

(i) परस्परं विवदमानाः प्राणादयः <u>प्रजापतिम्</u> एत्य अपृच्छन् ।

(ii) प्रथमं वाक् <u>शरीरात्</u> निर्गता ।

23 मृजया किं रक्ष्यते ? कुलं च केन ? 1+1=2

24 'शक्रः अग्रे समुत्पततः रथस्य अग्रे आगतानि शाल्मलीवृक्षे गरुडनीडानि पश्यति' इत्यत्र शाल्मलीवृक्षे कः किं पश्यति ? 1+1=2

25 तन्न युक्तं साम्प्रतं क्षणमप्यत्र स्थातुम् । तदाकर्ण्य प्रत्युत्पन्नमतिः प्राह–अहो, सत्यमभिहितं भवता । ममापि अभीष्टमेतत् । 1×3=3

(i) कः क्षणमपि तडागे स्थातुं न इच्छति ?

(ii) प्रत्युत्पन्नमतिः अपि किं कर्तुमिच्छति ?

(iii) 'उक्तम्' इति अर्थे किं पदमत्र प्रयुक्तम् ?

26 समुत्पन्नेषु कार्येषु बुद्धिर्यस्य न हीयते ।
स एव दुर्गं तरति जलस्थो वानरो यथा ॥ 1×3=3

(i) वानरः कुत्र स्थितः ?

(ii) कीदृशेषु कार्येषु धीरस्य बुद्धिः न हीयते ?

(iii) धीरः नरः किं तरति ?

27 कस्यचिदेकस्य पाठस्य सारांशं पञ्च वाक्येषु लिखत – 1×5=5

(i) त्याज्यं न धैर्यम्

(ii) भारतीयविज्ञानम्

(iii) प्रेरणा

## खण्ड – ख
## अनुप्रयुक्त व्याकरणम्

**28** अधोलिखितपदेषु सन्धिच्छेदं कृत्वा लिखत – **1+1=2**

(i) अस्य रक्षणे भारतस्य रक्षास्ति ।

(ii) ज्योतिर्विज्ञान क्षेत्रे योगदानम् ।

**29** सन्धिं कृत्वा लिखत – **1×3=3**

(i) स्पर्शस्तेन + अत्र विद्यते ।

(ii) ध्यायन् क्लेशान् स्वबन्धूनां तत् + हितैक परायणः ।

(iii) बलं सर्वबलेभ्यः + अपि सत्यमेवातिरिच्यते ।

**30** अधोलिखितवर्णानाम् उच्चारणस्थानं लिखत – **1+1=2**

क, च

**31** रिक्तस्थानानि कोष्ठके प्रयुक्तशब्दैः समुचित–विभक्ति–प्रयोगं कुरुत – **2**

(i) मा भ्राता ________ द्विक्षन् । (भ्रातृ)

(ii) ________ अहं चक्षुषा सर्वाणि भूतानि समीक्षे । (मित्र)

(iii) समानी वः आकूतिः समाना ________ वः । (हृदय)

(iv) मूर्ख ! न कोऽपि जनः ________ विना जीवति । (हृदय)

**32** रिक्तस्थानेषु अङ्कानां स्थाने संख्यावाचकपदानि लिखत – **3**

(i) __6__ शुनः गुणाः ।

(ii) __3__ शिक्षेत् गर्दभात् ।

(iii) वाक् प्रभृतीनि __5__ इन्द्रियाणि भवन्ति ।

**33** (i) ताः मे सन्तु सदा गृहे । **1×2=2**

(ii) तत्त्वमिदं चिन्तय सदा चित्ते ।

इति रेखाङ्कितपदयोः कः धातुः कश्च लकारः ?

**34** अधोलिखितवाक्यद्वये क्रियापदानि योजयत – **1×2=2**

(i) ब्राह्मे मूहूर्त्ते ________ । (उत् + स्था विधि)

(ii) दन्तधावनं जिह्वादन्तास्यजं मलं ________ । (हन्लट्)

**35** रेखाङ्कितसमस्तपदयोः विग्रहौ कृत्वा लिखत – **1×2=2**

(i) धृतिः क्षमा दमोऽस्तेयं शौचम् इन्द्रियनिग्रहः ।

(ii) वयमत्र प्रतिदिनं घटान् स्थापयामः ।

**36** अधोलिखिते विग्रहस्थाने समस्तपदं लिखत – **1×2=2**

(i) कुशाग्रा बुद्धिः यस्य (सः)

(ii) भोजनस्य अन्ते

**37** रिक्तस्थाने किं पदं भविष्यति ? **1+1=2**

(i) मानं ________ प्रियो भवति । (हातुम् / हित्वा)

(ii) सार्थः ________ मित्रम् । (प्रवसतुम् / प्रवसतः)

**38** रिक्तस्थानेषु रिक्तस्थानपूर्त्तिं कुरुत – **1×3=3**

(i) कथमहं ________ सह गच्छेयम् । (युष्मद्)

(ii) यदि मम ________ कार्यम् तर्हि वृक्षं प्रति नय । (हृदय)

(iii) मकरः जम्बुफलानि ________ यच्छति । (भार्या)

## खण्ड – ग

## रचनाकौशलम्

**39** अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत – **1×5=5**

जन्मभूमिः अस्मान् जननीवत् संरक्षति । अस्याः अन्नेन, जलेन, फलादीनां रसैश्च अस्माकं परिपालनं भवति । कर्पासेन निर्मितैः वस्त्रैः अस्माकं शरीरं सुरक्षितं भवति । अस्मिन्नेव धरातले गृहाणि निर्माय वयं ससुखं वसामः । इयं जन्मभूमिः मातुरप्यधिकम् उपकरोति । एषा यावज्जीवं पालयति पोषयति च । भारतवर्षम् अस्माकं मातृभूमिः जन्मभूमिश्च । इयम् अस्माभिः अहर्निशं पूजनीया, रक्षणीया, वन्दनीया च । अस्याः सौन्दर्यं तु अद्भुतम् एव । नदीभिः इयं सुजला । शस्यश्यामला च । देवताः अपि अस्याः गीतानि गायन्ति ।

**प्रश्नाः –**

(1) अस्माकं शरीरं केन निर्मितैः वस्त्रैः सुरक्षितं भवति ?

(2) वयं कुत्र गृहाणां निर्माणं कुर्मः ?

(3) काः अस्याः गीतानि गायन्ति ?

(4) 'संरक्षति' इति क्रियापदस्य कर्तृपदं किम् ?

(5) 'इयम् अस्माभिः अहर्निशं पूजनीया' इति वाक्ये 'इयम्' सर्वनामपदं कस्यै प्रयुक्तम् ?

**40** अधोलिखितं विषयमधिकृत्य मञ्जूषापदसहायतया पञ्चवाक्येषु एकमनुच्छेदं लिखत – **1×5=5**

**सत्सङ्गतिः**

**मञ्जूषा**

| |
|---|
| सज्जनानां, सङ्गतेः महान् प्रभावः, कीटः, देवतानां शिरसि, पुष्पाणां, आरोहति, क्रूरः सहृदयः, बुद्धेः जडतां, दुर्जनः, सज्जनः, सतां दर्शनं, कुसङ्गतिः, सर्वं, नाशयति, यशः, प्रसरति । |

**41** भवान् राकेशः छात्रावासे जयपुरविद्यापीठे वसति । भवतः विद्यालये संस्कृतदिवसे मालविका–अग्निमित्रम् इति संस्कृतनाटकस्य मञ्चनं भविष्यति । तत्र भवान् अपि अभिनयं करिष्यति । स्वपितृमहोदयान् प्रति तं प्रेक्षितुं निमन्त्रणपत्रं, मंजूषायाम् प्रदत्तैः शब्दैः रिक्तस्थानानि पूरयित्वा लिखतु – **1×5=5**

जयपुर विद्यापीठ छात्रावासः

तिथिः

परमादरणीयाः पितृमहोदयाः

सादरं नमामि ।

अद्य अहं सादरं (i) _______ यत् विद्यालये आगामि (ii) _______ संस्कृत दिवसस्य आयोजनं भविष्यति । तत्र (iii) _______ नाम नाटकं प्रस्तूयते । एतस्मिन् (iv) _______ अहमपि अभिनयं (v) _______ । भवान् मात्रा सह आगत्य अवश्यमेव पश्यन्तु ।

भवतां प्रियः पुत्रः

राकेशः

**मञ्जूषा**

| |
|---|
| मालविकाग्निमित्रम्, निवेदयामि, अवसरे, मासे, करिष्यामि, दिवसस्य |

**42** अधोलिखितं चित्रं दृष्ट्वा पञ्च वाक्येषु वर्णनं कुरुत – **1×5=5**



**मञ्जूषा**

| |
|---|
| विजयादशमी पर्व, रावणस्य पुत्तलम्, दश शिरांसि, अग्निना, रज्जूभिः बद्धः, ज्वालाभिः, धूम्रः, बहवः जनाः, बालकाः, महिलाः, एकत्रिताः, पश्यन्ति, अन्धकारे, दुराचरणस्य, समाप्तिः । |